[illegible]

नं० [illegible]

[illegible]

[illegible]

ऊ. म्ना. १

श्रीदेव्युवाच कुलेशश्रोतुमिच्छामि कुलधर्मोत्तमोत्तमम्
ऊर्ध्वाम्नायस्य माहात्म्यं तन्मन्त्रं वद मे प्रभो १

श्रीगणेशाय नमः ईश्वर उवाच शृणु देवि प्रवक्ष्यामि य[redacted]
म्नायं परिपृच्छसि यस्य श्रवणमात्रेण देवता संप्रसीदति १ कस्यचि
न्न मया ख्यातमितः पूर्वं कुलेश्वरि कथयामि तव स्नेहादूर्ध्वाम्नायं ।
शृणु प्रिये २ वेदशास्त्रपुराणानि प्रकाश्यानि महेश्वरि शैवागमा
गमाः सर्वे रहस्याः परिकीर्तिताः ३ रहस्यातिरहस्यानि कुलशास्त्राणि
पार्वति रहस्यातिरहस्यानां रहस्यमिदमम्बिके ४ ऊर्ध्वाम्नायार्थत
त्त्वेहि सृष्टिसंहारात्मके परे ब्रह्मगोप्यं मया यत्नाद्दिदानीं तु प्रकाश्यते २
मम पंचवक्त्रेभ्यः पंचाम्नायाः समुद्गताः पूर्वश्च पश्चिमश्चैव दक्षि
णश्चोत्तरस्तथा ६ ऊर्ध्वाम्नायश्च पंचैते मोक्षमार्गाः प्रकीर्तिताः आ
म्नायाश्च बहवः सन्ति नोर्ध्वाम्नायेन ते समाः ७ सत्यमेतद्वरारोहे । १

वः

नात्रकार्याविचारणा आम्नायाबहवोशम्भोश्चनराम्नायभेदजाः ८
अस्मिंस्तंत्रेमयाख्याताःऊर्ध्वेतेऽकुलनायके चक्रराम्नायवेत्तारोबहवः
संतिभामिनि ९ ऊर्ध्वाम्नायार्थतत्वज्ञाविरलावीरवंदिते यावंतःप
सर्वोऽस्मेस्तावंतिसमुदीरिताः १० एकैकाम्नायजामंत्राभुक्तिमुक्ति
फलप्रदाः उपमंत्राश्चतावंतःशावराःसम्प्रदायकाः ११ मय्येवकथि
तास्तेपिलोकानुग्रहकांक्षया सर्वेषामपिमंत्राणांदेवतास्तत्फलप्र
दा १२ आवयोरंशभूतास्तेसमुद्दिष्टाःशुचिस्मिते सर्वमंत्रानहंवेद्मि स्मि
नान्योजानातिकश्चन १३ मत्प्रसादेनयःकोपिवेत्तिमानवकोटिषु
एकाम्नायंद्वयोर्वेत्तिसमुक्तोनात्रसंशयः १४ किंपुनश्चक्रराम्नायवे
त्तासाक्षाच्छिवोभवेत् चक्रराम्नायविज्ञानादूर्ध्वाम्नायःपरःप्रिये १५

ऊ. तस्मात्तदेव जानीयाद्यदिच्छेदात्मनो हितं ऊर्ध्वात्सर्वधर्माणामूर्ध्वा
म्ना. म्नायः प्रशस्यते ऊर्ध्वेन यत्नयत्नयस्माचेदूर्ध्वाम्नाय इतीरितः १६ उज्झितत्वा
२ त्क्लेशानिधत्त संसारसंकटात् ऊर्ध्वलोकैकसेवात्वादूर्ध्वाम्नाय इति
2 स्मृतः १७ तस्माद्देवेशि जानीहि तस्मान्मोक्षैकसाधनं सर्वाम्नायाधि
कं पुण्यमूर्ध्वाम्नायं परात्परं १८ सर्वलोकेषु सर्वेषां महच्छ्रेयो यथाश्रि
ये आम्नायेषु च सर्वेषु ऊर्ध्वाम्नायस्तथाप्रिये १९ देवतानां यथा विष्णु
र्ज्योतिषां भास्करो यथा अश्वमेधः क्रतूनां च पाषाणानां यथा मणिः २० शिः
यथा रसानां मधुरो लोहानां काञ्चनं यथा चतुष्पदां यथा धेनुर्यथा हं
सस्तु पक्षिणां २१ आश्रमाणां यथा भिक्षुर्वर्णानां ब्राह्मणो यथा म
नुष्याणां यथा राजावयवानां यथा शिरः २२ आमोदानां तु कस्तूरीय २

याकांचीउरीश्च नैवेवसर्वधर्माणांमूर्ध्वाम्नायोधिकः प्रिये २३ नानाज
न्मार्जितपरपुण्यकर्मफलोदयात् ऊर्ध्वाम्नायंविजानीयान्नान्यथावीरवंदि
ते २४ नवेदैर्नागमैः शास्त्रैःनपुराणैःसविस्तरैः नयज्ञैर्नतपोभिर्वान
तीर्थव्रतकोटिभिः २५ नान्यैरुपायैर्देवेशि मंत्रौषधिपुरःसरैः आम्नायो
म्नायनेचोर्ध्वःश्रीमद्गुरुमुखंविना २६ नमेवा घयेनस्मात्सर्वज्ञंकरुणा
निधिः सर्वलक्षणसंपन्नमूर्ध्वाम्नायार्थकोविदं २७ तस्माद्देवि विजानी
यादूर्ध्वाम्नायंकुलेश्वरि लभतेकांक्षितांसिद्धिंसत्त्वसंपन्नवरानने २८ ऊ
र्ध्वाम्नायंविजानातियःसम्यक्श्रीगुरोर्मुखात् शास्त्रमार्गेणसनरोजी
वन्मुक्तोनसंशयः ईदृशंचोर्ध्वाम्नायंवैयोजानातिहितव्रतः सर्वपुःस
गुरुःसोर्च्यःसवैविज्ञःसमोक्षिकः ससेव्यःसचमेसत्यंतत्वंयष्टव्यःससाति

उ. कः स च ज्ञानी स तपस्वी च सोऽनुष्ठाता स च यजकः स वेदागमशास्त्रादिसर्वविद्या
म्ना. विशारदः स आचार्यः स च श्रीमान्स पण्डितः स च कौलिकः स यज्वा स च ह्ना
२ न्मा स जापी स च साधकः स योगी स कृतार्थश्च स वीरः स च उत्तमः स पुण्या
3 त्मा स सर्वज्ञः स भक्तः स शिवः प्रिये तत्कुलं पावनं देवि यस्मात्तज्जनी स्तुता न
नमितास्त्रकृतार्थश्चान्मुक्तस्त्वमितरस्तथा भूपास्तद्देशजाः सर्वे पूतास्त
न्मित्रबान्धवाः बहुनेह किमुक्तेन चोर्द्धाम्नायपरस्य च स्मरणं कीर्तनं वापि
दर्शनं वन्दनं तथा संभाषणं च कुरुते गजसूयादिकं फलं स यत्र वसते दे
वि तत्र श्रीर्विजयो भवेत् अनामयं सदा हृष्टं सम्यग्भिक्षे निरुपद्रवः तस्मा
द्गुरुप्रसादेन चोर्द्धाम्नायं नरोतमः यो वेत्ति तत्त्वं देवि स मे प्रियतमो भवेत् तो
एवाम्नायः स्पष्टरूपः स्थिररूपप्रदक्षिणः संहारः पश्चिमो देवि उत्तरोत्तु। २

ग्रहो भवेत् मंत्रयोगं विद्धुः पूर्वे भक्तियोगं तु दक्षिणे पश्चिमे कर्मयोगं तु
ज्ञानयोगं तथोत्तरे पूर्वाम्नायस्य संकेतास्त्वष्टाविंशतिरीरिताः दक्षिणाम्ना
यसंकेताः पंचविंशतिरीरिताः पश्चिमाम्नायसंकेता द्वात्रिंशत्समुदाहृताः
विद्धुः षट्त्रिंशदाम्नायः संकेताः श्रीमदुत्तरे ऊर्ध्वाम्नायस्य चैतानि न संति कु
ना लयके साक्षाज्ज्ञानस्वरूपेण वा न किंचित्कर्म विद्यते ऊर्ध्वाम्नायस्य माहात्म्य
मितीनेकथितं मया समासेन कुलेशानि मंत्रमाहात्म्यमुच्यते यतः ए
वं मयानोक्तं यस्य कस्यापि पार्वति न ह्यदामि न वक्तव्ये हा व्छुण्डमन्याणव
द्दभे श्रीप्रसादपरामंत्रमूर्ध्वाम्नायमपि ष्ठितं आवयोः परमाकारं येवे।
निसशिवःस्वयं शिवादिकिमिपर्यंतं प्राणिनां प्राणवर्त्मनो निःश्वासो
च्छ्वासरूपेण मंत्रोयं वर्त्तते प्रिये अनिलेन विना मेघो यथाकाशेन चेष्टते प

नालहंते २

कु. राप्रासादमंत्रेणविनालोकस्तथाप्रिये पराप्रासादमंत्रार्थंस्मृतमेतच्चवरा
मा. वरं प्रभिन्नंनवनीतंदेवि ... यथानिलः बीजेंकुरस्तिलेतैलंमध्वा
ध २ वौसं ... वौप्रभा वैद्र्ज्योत्स्नानलःकाष्ठेषुछायागंधोजलेरसः शब्दश्चाथशि
वेशक्तिःक्षीरेसर्पिःफलेरुचिः शर्करायांचमाधुर्यंचन्दनसारेवशीतले
निग्रहानुग्रहौमंत्रेप्रतिमायांचदेवता दर्पणेप्रतिबिंबंचसमीरेवलनंय
था पराप्रासादमंत्रोयंप्रपंचेपितथास्थितः सुपक्वेषुपदार्थेषुसरसेषु नटवीजे
कुलेश्वरि लवणेनविनास्वादुर्यथाभोक्तुर्नजायते पराप्रासादमंत्रेणये
मंत्रावानसंगताः तेफलंनप्रयच्छंतिमंत्रशक्तिविवर्जिताः श्रीप्रासादप
रामंत्रगोपनायकुलेश्वरि विचार्यार्हंप्रराणनिदर्शनाम्नायवेदनाः सम
वीक्ष्यंतयेमंत्राःशास्त्राणिविविधानिच भ्रमंतियेषुमूर्खास्ते ...माययाविमो ४

नव

हिताः जायंते च म्रियंते च संसारक्लेशभाजनाः न लभंते हि मोक्षं ते न तत्प्र
सादविवर्जिताः मद्रूपे श्रीगुरौ यस्य दृढभक्तिः प्रजायते पूर्वजन्मसहस्रे
षु शिवादिसमयोदितान् चतुराम्नायजान्मंत्रान् सर्वं तु ज्ञात्वा भविष्यति सपाप क्नु
कंचुकोन्मुक्तः शुद्धात्मा गुरुवत्सलः श्रीप्रासादावरं मंत्रं विजानाति न चान्य
था श्रीप्रासादपरामंत्रं सत्यानां सुप्रमुच्यते ब्रह्मविष्णुरुद्राश्च शक्रादिः सु
रपुंगवाः वसुरुद्रार्कदिक्कालमनुचंद्रादयः प्रिये मार्कंडेयादिमुनयो वसि
ष्ठादिमुनीश्वराः सनकाद्याश्च योगीशा जीवन्मुक्ताः शुकादयः यक्षकिन्नर
गंधर्वसिद्धविद्याधरादयः श्रीप्रासादपरामंत्रप्रसादात्कामितं फलं प्राप्यमंत्र
परं नित्यं जपंत्यद्यापि पार्वति सामर्थ्यं सुरूपता विद्या तेजः सौख्यमरोग्यता रा
ज्यं स्वर्गं च मोक्षं च परा प्रासादजापिनः रुद्रेंद्रब्रह्मविष्णूनामपि दुरापं यत्पदं स

ध्यो-२

कु॰ वेयमेविहीनोपिपराप्रासादमंत्रवित् सुखेनयांगतिंयातिनतांसर्वेपिधा
स्त्रा॰ र्मिकाः तस्यचिंतामणिर्धेनुःकल्पतरुर्गृहे कुवेरःकिंकरःसाक्षात्पराप्रा
५ सादज्ञापिनः यथादिव्यरसस्पर्शाल्लोहोभवतिकांचनं पराप्रसादज्ञापीवपशुवि ः
5 पशुपतिस्तथा श्रीप्रासादपरामंत्रंयोजानातिहितत्त्वतः समांचत्वांवजा।
नातिचावयोरपिसप्रियः पराप्रासादमंत्रज्ञःस्वपचोवापिपावेति देवतास्था
पनेशक्तःप्रतिमादिषुसंशयः मंत्रमात्रेवयोवेत्तिपराप्रासादसंज्ञकं स्वप
चोवापिमुच्येतकिंपुनस्तद्विधानवित् पराप्रासादमंत्रज्ञोयत्करोतियदीक्ष
ति यच्छृणोतितन्महेशानितपोध्यानंजपोभवेत् दीक्षापूर्वंमहेशानिपारंपर्य
समन्विते पराप्रासादमंत्रेयोवेत्तिसोवानसंशयः चराचरसमेतानिभुवना
निचतुर्दश पराप्रसादमंत्रज्ञस्तदेहेतिष्ठतिपार्वति पराप्रासादमंत्रज्ञोयत्र ५

छं.ति घं

तिं भामिनि द्विसहस्रेषु समुद्दिष्टं समंतात् दशयोजनं पराप्रासादमंत्रार्थेन तत्र
लेऽकुलनायिके स्वरास्वराश्च वर्द्धन्ते किं पुनर्मानवादयः पराप्रासादमंत्रज्ञस्य म
त्रनिष्ठं तिष्ठति पार्वति देवत्वेन नदी योगिमुनिदेवगणैः सह शैववैष्णवसौरगार्के
गाणपत्येंदुसंभवान् सर्वमंत्रान्स जानाति पराप्रासादमंत्रवित् श्रीप्रासादप
राख्यमंत्रो जिह्वाग्रे यस्य वर्त्तते तस्य संदर्शनादेव स्वपचोपि विमुच्यते ब्राह्मणो
वांत्यजो वापि शुचिर्वाप्यशुचिः प्रिये पराप्रासादजापी यः स मुक्तो नात्र संशयः
गच्छंस्तिष्ठतो वापि जाग्रतः स्वपतोपि वा पराप्रासादमंत्रोयं देवेशि नवनिः
फलैः चिरणैकैकफलदा मंत्राः संति सहस्रशः ऊलेषा मंत्रराजोयं यः सीक्रस
वफलप्रदः पराप्रासादमंत्रोयं सर्वमंत्रोत्तमोत्तमः जानतोऽजानतो वापि
भजतां कामदो मणिः शचीन्द्रे रोहिणी चंद्रे स्वाहाग्नौ व प्रभा रवौ लक्ष्मीना

कु. गयणो वा मायाधाना रौ गिरिजा शिवौ अग्निसोमौ बिंदुनादौ देवि प्रकृतिपु
मंत्रा. रुषौ आधाराधेयनाशौ च भोगमोक्षौ कुलेश्वरि प्राणापाणौ च शब्दार्थौ वि
९ धेविधिनिषेधकौ सुखदुःखादियद्वंद्वं द्वंद्वरूपेन प्रयनेपि वा सर्वलोकेषु यत्स
र्वमातावामेव न संशयः पुंस्त्रीरूपाणि सर्वाणि चावयोरंशजानि हि पराप्रसा
द मंत्रोयं तत्स्वात्मको भवेत् अखंडभावनागम्यं परं ब्रह्म कुलेश्वरि निष्क
लं निर्मलं नित्यं निर्गुणं व्योमसन्निभं अनंतमव्ययं तत्त्वं मनोवाचामगोचरं
पराप्रासादमंत्रानुसंधानात्संप्रकाशते तस्मान्मंत्रमिदं देवि पराप्रासाद
संज्ञकं परतत्त्वस्वरूपत्वात्सच्चिदानंदलक्षणात् शिवशक्तिमयत्वाच्च भु
क्तिमुक्तिप्रदानतः सकर्मापि च निष्कर्मा सगुणो वापि निर्गुणः श्रीप्रासाद
परामंत्रं सर्वमंत्रशिखामणिं जपन्मुक्तिं भुक्तिं च लभतेनात्र संशयः वद्ग ९

नात्र किमुक्तेन सर्वसारं शृणु प्रिये श्रीप्रासादपरामंत्रसमो मंत्रो न विद्यते इ
दमेव परं ज्ञानमिदमेव परो जयः इदमेव परं ध्यानमिदमेव परार्चनं इदमेव
परा दीक्षा इदमेव परं जपः इदमेव परं धर्ममिदमेव परं व्रतं इदमेव परो यज्ञ
मिदमेव परा तपः इदमेव परं श्रेय इदमेव परं फलं इदमेव परं तत्त्वमिदमेव ।
परं गतिः इदमेव परं गुह्यं सत्यं सत्यं न संशयः इति मत्वा मन्त्रवरं तन्निष्ठः स्या
त्सदा प्रिये नास्ति गुर्वाधिकं तत्त्वं न शिवाधिकदैवतं न हि वेदाधिका विद्या न
कुलाधिकदर्शनं न कुलाद्याधिको ज्ञानी ज्ञानाद्दानाधिकं सुखं नाष्टाष्टकाधि
काष्टज्ञानं हि मोक्षाधिकं फलं श्रीप्रासादपरामंत्रादधिकं नैव विद्यते इदं स
त्यमिदं सत्यमिदं सत्यं न संशयः श्रीप्रासादपरामंत्रमाहात्म्यमिह वर्णितं न
शक्नोमि वरारोहे कल्पकोटिशतैरपि गिरौ सर्षपमात्रं तु सागरे तु जलकणवत्

कु॰ तथा च मंत्रमाहात्म्यं किंचित्कथितं मया ऊर्ध्वाम्नायस्य माहात्म्यं श्रीप्रासाद
त्मा परामृतौ: श्रीदेव्युवाच कुलेश श्रोतुमिच्छामि श्रीप्रासादपरात्मकं मंत्रराजं
७ वदेशान न्यासध्यानादिभिः सह श्रीईश्वर उवाच शृणु देवि प्रवक्ष्यामि यन्मां
त्वं परिपृच्छसि तस्य श्रवणमात्रेण शिवाकारः प्रजायते इतः एवं मयानोक्तं
मंत्रोयं यस्य कस्यचित् तव स्नेहाद्ददाम्यद्य शृणु [illegible]णा वल्लभे अनंतं वेदसं
वन विंदुविंदुयुगान्वितं श्रीप्रासादपरामंत्रो भुक्तिमुक्तिफलप्रदः पराप्रासा
दमंत्रस्तु सादिः कः कुलेश्वरि अनंतः हकारः वेदः सकारः भुवनश्चौकारः
विंदुरनुस्वारः विंदुयुगं विसर्गः एतैः हसौः इति वीजं सिद्धं अयं प्रासादपरा
मंत्रः अयमेव मंत्रः सकारादिश्चेत् पराप्रासादमंत्रो भवति तथा प्रकाशानं
दरूपत्वात् स्वस्वफलदानतः प्रसन्नचित्तरूपत्वात् सिद्धार्थनिरूपणात् प्रक ७

नाद्यप्रशमनात्मयत्नार्त्तिनिवारणात् प्रसादकरणाच्छ्रीं प्रासादमन्त्रईरि
नः परतत्त्वस्वरूपत्वात्प्रसिद्धार्थनिरूपणात् परमानंददानत्वात्परमैश्वर्यका
रणात् परोक्षफलदानात्परधर्मनिदर्शनात् परत्वात्सर्वमंत्राणां परामंत्रर
तीरितः ऊलमंत्रमिदं देवि न्यासान् शृणु वदामि ते अथ प्रातः समुत्थाय गुरु
देवात्मचिंतनं कल्पन्मूलेन कृत्वा वक्ष्याद्विरामप्रमोचनं शौचास्यशोधनं।
स्नानं संध्यातर्पणमाचारेत् एकांते द्वारयजनं विघ्नत्रयनिवारणं पूजास्थानं
प्रवेशं वक्ष्यात्समुपवेशनं देवि पूजागृहध्यानं शिवादिगुरुवंदनं आसनेग
णपदैतेत्रपालवंदनमीश्वरि पादुकास्मरणं कुर्याद्दीपनार्थार्चनं प्रिये करांग
शोधनं प्राणायामं सत्त्वसंरक्षकं दिग्बंधनं चोगगुरुं विधिपूर्वकाच्चमातृका द
शप्रकारश्चात्माख्यलिपिः कमठसंज्ञकं षड्दीर्घमूलबीजेन षडंगानि च पार्वति

पु॰ पंचब्रह्माणि च तथा चांगुलिन्यासमेव च आधारशक्तिमारभ्य पीठमंत्रांन्नमं।
म्ना॰ विके पुनः षोढाकुलेशानि कुर्यात्सर्वांश्च कर्मणा महाषोढाख्यं न्यासं ततः कु
८ र्यात्समाहितः वक्ष्यमाणेन विधिना देवताभावसिद्धये यस्य कस्यापि नैवोक्तं त
8 वस्तेह्यहं हदाम्यहं प्रपंचो भुवनं मूर्तिर्मंत्रदैवतमातरः महाषोढाङ्कयोन्यासः स
र्वन्यासोत्तमोत्तमः। ललितावितासे। ऋषिर्ब्रह्मा समुद्दिष्टो गायत्री छंद ईरितं अ
र्द्धनारीश्वरो देवो देवता परिकीर्तितः आकाराद्यैः स्वरैर्ह्रस्वैर्नपुंसकविवर्जितैः
संयोज्य करशुद्धिं तथं विन्यसेन्मूर्तिपंचकं अंगुष्ठादिष्वंगुलीषु मूर्द्धास्यहृदयेषु च
गुह्ये पादद्वये पंचवक्त्रस्थानेषु विन्यसेत् ईशानाख्यं न तत्पुरुषमघोरं च तृतीय
कं चतुर्थं वामदेवं च सद्योजातं च पंचमं त्रिनाग्नेनेहसोंस्पहो मीशीनायत
मस्ततः अंगुलीषु च मूर्द्धादिष्वेवं विन्यसेद्देशिकः ईशानायोर्ध्ववक्त्राय नमो ८

मूर्द्धनि विन्यसेत् एवं नस्तु कषायांते सर्व्ववक्त्राय हृन्मध्ये दक्षकर्णे च वामे च
हृदयस्थं प्रविन्यसेत् दक्षिणं चोत्तरं वक्त्रं पश्चिमशिष्टमूर्त्तिभिः इत्यंगप्रवि
न्यासं वक्ष्यमाणेस्मिन्नृषिवे महापीठाद्यन्यासं ततः कुर्यात्समाहितः तत्रादौ
परमेशानि प्रपंचन्यासमुच्यते प्रपंचद्वीपजलधिगिरिपत्तनपीठकाः क्षेत्रवा
नाश्रमगुहानदीचत्वरकोद्भिज्जाः स्वेदजाण्डजराशयस्तारस्थकादिवर्षाश्च श्रीर्मा
याकमला विष्णुवल्लभा पद्मधारिणी समुद्रतनया लोकमाता कमलवासिनी
इंदिरा मा रमा पद्मा तथा नारायणप्रिया सिद्धलक्ष्मी राज्यलक्ष्मी महालक्ष्मीरिती
रिताः शक्तयः स्युः प्रपंचानां स्वराणामधिदेवताः लवस्त्रुटिः कलाकाष्ठानि
मेषः स्यात्समयश्च घटिकाश्च मुहूर्त्तश्च प्रहरो दिनमेव च संध्यारात्रिस्तिथिश्चै
व वारो नक्षत्रमेव च योगश्च करणं पक्षो मासो राशिरेव तथा अयनं वत्सर

ङु· गुणांश्चलयापंचविंशतिः आर्योमांचंडिकादुर्गाशिवापर्णाम्बिकासती ईश्व
स्त्रा· रीशांभवीशानीपार्वतीसर्वमंगला दाक्षायणीहैमवतीमहामायामहेश्व
१ री मृडानीचैवरुद्राणीशर्वाणीपरमेश्वरी कालीकात्यायनीगौरीभवानी।
9 तिसमीरिताः शब्दरूपरसलवादीनांस्पर्शानामधिदेवताः पंचभूतास्तन्मात्रा :
कर्मज्ञानेंद्रियाणिताः अंतःकरणावस्थाथानदोषादशेरिताः ब्राह्मीवागी
श्वरीवाणीसावित्रीचसरस्वती गायत्रीवाक्प्रदापद्माक्षाशारदाभारतीप्रिये विद्या
त्मिकापंचभूतव्यापकानामधीश्वराः त्रिताराममूलविद्यांते मातृकाक्षरतः परे
वदेत्प्रपंचरूपायैश्रियैनमः इतिक्रमात् प्रपंचादिभिरामोऽसवर्णाशक्तिर्नियो
जयेत् मातृकान्याससंप्रोक्तस्थानेषु परमेश्वरि त्रिताराम्मूलसकलप्रपंचस्यात्म
रूपतः आद्यैपरांवादैश्चैनमः उक्त्वाव्यापकंन्यसेत् प्रपंचमासमपवंसमाठुवन। १

२० ॥

न्यासमुच्यते त्रिनासमूलविद्यां तेषु ग्रां मिमनले वदेत् लोकं च निलयं चैव।
शतकोटिपदं ततः गुह्यात्मा योगिनी मूलदेवतां तेषु तेषु प्रिये वदेदाधारश
क्तिं वादेत्यैह्यान्यादयो न्यसेत् ह्रंह्रूं वितले गुह्यलोकं चानन्तसत्तकं शेषं च ए
वं वन्मोङ्का गुल्फयोर्विन्यसेत्प्रिये क्षंक्षं सुतले वापि गुह्यं वा विन्यसेत्तिकं शे
षं च एवं वन्मोङ्का जंघयोर्विन्यसेत्प्रिये लूं मे मैं महातले च महागुह्यं सुतन्त्र
कं शेषं च एवं वन्मोङ्का देविजान्वोश्च विन्यसेत् श्रीं मौं तलातले परमगुह्यं
वोङ्का वितानकं शेषं च एवं वन्मोङ्का वोर्वो देवेशि विन्यसेत् श्रमो रसातलं
चैव रहस्यं तानसंज्ञकं शेषं च एवं वन्मोङ्का गुह्यदेशे न्यसेत्प्रिये कवर्गमपि
पातालं सरहस्यं च नन्दिकया शेषं च एवं वन्मोङ्का मूलाधारे न्यसेत्प्रिये च व।
गं भूरति रहस्यं च श्रीडाकिनीमपि शेषं च एवं वन्मोङ्का स्वाधिष्ठाने न्यसेत्प्रिये

कृ॰ मं॰ १॰ टवर्गं भूषणमहारहस्यं राकिनीमपि शेषं च सर्वं वन्यो ज्ञानाभिदेशे न्यसेत्प्रि
ये तवर्गं स्वच्छपरमरहस्यं लाकिनीमपि शेषं च सर्वं वन्यो ज्ञा हृदये विन्य
सेत्प्रिये पवर्गं च महाग्रन्थं काकिनीमपि च क्रमात् शेषं च सर्वं वन्यो ज्ञा कंठदे
शे न्यसेत्प्रिये यवर्गं च नेत्रमन्तरस्थां साकिनीमपि शेषं च सर्वं वन्यो ज्ञा वा
ज्ञायां विन्यसेत्प्रिये शवर्गं तपस्यापि ग्रन्थं श्रीहाकिनीमपि शेषं च सर्वं वन्यो
कालरात्रै विन्यसेत्प्रिये लं क्षं सत्यमहाग्रन्थं याकिनीमपि च प्रिये शेषं च स
र्वं वन्यो ज्ञा ब्रह्मरंध्रे न्यसेत्सुधीः त्रिनाडमूलमंत्रेण तेन चैव दशाङ्गं च वदेत् ना
पिपायै श्रीपदं वादेश्वेच्छाव्यापकं न्यसेत् ततो वैष्णवनामानि मूर्तिन्यासमथा
चरेत् केशवनारायणमाधवमाधवगोविंदविष्णवः मधुसूदनसंज्ञस्तथा
त्रिविक्रमवामनौ श्रीधरश्च हृषीकेशः पद्मनाभो दामोदरः वासुदेवः संक १॰

10

षणः प्रद्युम्नश्चानिरुद्धकः अनंताद्येश देशानाउग्री श्वेनयनस्तथा ऋद्धि
स्सल्पिणीलमालम्नदीर्घकनायिका प्रकाशिणी बोधनी बोधिका चांजनप्रभा
अस्थिमाला परा चेति संप्रोक्ताः रुद्रदेवताः भवः शर्वोथ रुद्रः पशुपतिश्चोग्र
एव महादेवस्तथा भीम ईशस्तत्पुरुषाह्वयः अघोरः सद्योजातश्च वामदेवः रती
रितः करभद्राखलवलागरिमादिफलप्रदा घोरपादपंकिनासा तथाचेद्रा
हधारिणी छंदोमयी नगास्यानाङ्कृतिश्च जननः परा ज्ञानदावनन हं कंठ
कृपरा ठंक्रुतिश्च डामरी कणादीनां ढंङानानां वर्णानां देवतास्त्विमाः ब्रह्माप्र
जापतिर्वेधा परमेष्ठी पितामहः विधाना थविरि[illegible]श्वस्रष्टा वनरान
नः हिरण्यगर्भश्चैताः क्रमाद्ब्रह्मादयो दश यक्षिणी रंजनी लक्ष्मी वज्रिणी
शष्टिधारिणी षडाधारलया सर्वनायिका हसितानना ललिता वहमाचे

त्रि॰ निशोन्मायाद्याणांदेवताः त्रितारमूलमंत्रांतेसाराविस्फुल्लशक्तिकान् वत
म्ना॰ र्थ्यातमसाप्तकान्मलकेवान्न्येन्यसेत् संस्कंधपार्श्वकभूरजानुजंघापदेषु व
११ दनादिवामपर्यंतं विन्यसेत्परमेश्वरि कभायणीश्रुनान्मंत्रान्भवानीशक्तिसंयु
तान् पादापार्श्वबाहुकंठपंचवक्त्रेषु विन्यसेत् दनापोरेषु ब्रह्मादियोदिश
क्तियुतान्न्यसेत् त्रितारमूलमंत्रांते श्रीमूर्तिविकानतः श्रायैपरांवादेवीनम
उक्तांव्यापकंन्यसेत् मूर्तिन्यासं विधायैव्यं मंत्रन्यासमथाचरेत् त्रितारमूलमं
६ त्रां[illegible]यकलतंवकोटिव मेदस्थश्रणावाद्येका[illegible]त्मास्विलमंत्रतः ननोपि क्ष
देवनायैस्वात्मकलेवफलप्रदं श्रायैतर्यैकक्रदेश्वर्यैमवादेव्यैनमोवदेत् ई
मस्फूंवहिलनादिहंसादिपूर्ववत्स्मरं क्लंक्रंल्लंचविलतादिविकृतं पूर्ववत्स्मरे
त्रैमैमैंववत्तलितंचंद्रादिपूर्ववत्स्मरं श्रीमेमंमः पंचलंतं सूर्यादिपूर्ववत्स्मरे ॥

कं खं गं घं ङं षट्दलान्ते स्कन्दादिरुद्रैर्वेवस्मरं छं जं झं सप्तदलान्ते गणेशादिरुद्रैर्वेवस्म
रं ञं टंकमष्टदलान्ते बटुकादिरुद्रैर्वेवस्मरं नंथंदमेकादशदलान्ते शैव्यादिरुद्रैर्वेव।
स्मरं धंनंपं द्वादशदलान्ते बाणादिरुद्रैर्वेवस्मरं फंबंभं त्रयोदशदलान्ते लक्ष्म्यादिरुद्रैर्वे
वस्मरं नंटंठं नवदलान्ते ब्रह्मादिरुद्रैर्वेवस्मरं डंढंणं दशदलान्ते विष्ण्वादिरुद्रैर्वेव
स्मरं मंयंरंवं चतुर्दशदलान्ते गौर्यादिरुद्रैर्वेवस्मरं लंवंशं पंचदशदलान्ते दुर्गादिरुद्रैर्वेव
स्मरं षंसंहंक्षं षोडशदलान्ते वैष्णव्यादि विषोडश तत्वात्मखिलमन्त्राधिदेवताः सकले
भवेत् तथा फलप्रदा ये षोडशैकच्छेदपरीशतः श्रीवादेव्यै नमः श्रोक्तो मन्त्रमा
सोमसूर्येश्वरि आधारलिङ्गयोर्नाभिहृत्केन्द्रासौ लिकण्ठे निरोधिकायाम
र्द्धेन्दौ बिन्दौ चैककलापदे उन्मादिष्वत्रकेषु नादानादान्तयोरपि ऋक्षमण्डल
देशे च विन्यसेत्कुलनायिके त्रिनारामूलमन्त्रान्ते सर्वमन्त्रात्मिकापदे अर्येय परे

वादेवैवस्वदयेव्यापकंन्यसेत् मंऊर्ध्वास्वविद्यायैन्यंदैवतत्वासमावरेत्
त्रिनारमूलमंग्रांतेश्चश्रांसहस्रकोटिव योगिंऊलशह्रांतेसेविनाथैपदेवदे
नविधिनिकृंतनंवादेवैनमरस्तुद्वारेन्त्रिये ऽदंयोगीश्वरिमोवशेषंऽर्वंपडु
स्वरेत् उंऊंतपश्चिविद्यांवशेषंऽर्वंडुस्वरेत् श्रंश्रंशांतेतथाशांतिशेषंऽर्वं
वडुस्वरेत् लृंलॄंश्रुनिशांसनोलाशेषंपृपेदेवंतत्त्वह्रूं लेखांशेषं श्रोंभौरक्तसश
ह्रांतेगगनांऽर्वंवडुस्वरेत् श्रमविद्यापंरकांशेषंकंखंसिद्धमहालक्ष्मीशे
षंगघंसाघ्यंकरालीवशेषंङं. चंतथास्मरजपाशेषं छंजंगंधर्वीविजयांशेषं
झंञंगुह्यकशाह्रांतेश्वजितांऽर्वंवस्परां टंठंपद्मापराजिताशेषंडंढंकिन्नर
वामांवशेषंणंतंवपन्नगश्चेष्टांशेषं थंदंगणेशमायावशेषं धंफंभैरवश।
ह्रांतेऊंडलींपूर्ववत्स्वंरवंभंवडुककालीवशेषं मंयंतत्त्वेशाह्रांतेकालरात्रि

वष्र्वंवन् रंलं प्रथमभगवंनी शेषंष्ठ॰ वेशं ब्रह्माव सर्वेश्वरी शेवंसंविस्तुंव
सर्वेत्तांवशेषं हूंलं रुद्रं सर्वंकर्ती शेषं मंयेत्तेरेशशाह्वांतेकालरात्रिंवष्र्वंव
न् ह्रेवरावरशाक्तिंवशेषंष्ठ॰ श्रंगुंष्ट्रशल्फजंघ्यावजानूरुकटिपार्श्वयोः ह्नन
कन्तकरस्कंधकर्णामूर्द्धिवंरयके दत्तभोगादिवामांतेविन्यसेत्त्कलनायिके
त्रितारमूलमंत्रेनसर्वदेवात्मिकाननः श्रायैपरांवादेवौवचक्षुदयेनत्तव्यापकं
देवन्यासंविधायेस्यमात्रकान्यासमावरेत् त्रितारमूलमंत्रेनवर्गानंन्तकोटि
भू वरीऋलेंवसंहितायेश्रांत्तांमंगलापरं श्रेवादेवौततोन्यासंत्तांब्रह्माणि
नःपदं श्रेवादेवौततोनंन्तकोटिभूतऋलेवदेत् संहितायेचश्रंतंमंगलना।
थायश्रेवदेत् त्रयाम्रिंतांवभैरवनाथायनमउच्चरेत् ववंर्गखेवरीमीलांव
विकांवमहेश्वरी वेतालमिलिवविंकंवरुकंशेषंवषवंवन् ठवर्गपाताल

ॐ
म्रा॰
१२
13

वंरीमूहांयोगेश्वरीवेदेन् कौमारींपिणावंडंहेवदे गंशांचंडकौ नवर्गादि
क्षरींरिंस्याद्दरस्मिन्हंवावैस्नवी अयस्मीं रिंसंहरस्मिहक्रोयादिरर्ववन् पा
वर्गस्मद्दवेरीलंषांभद्दिनोवाराहतःपरं स्याद्ब्रह्मरात्तसंलंषंमधुम्नमादिरु
वेवन् पवर्गः स्याद्दिरिवंरीयैंशांकिलिकिलेनिच इंद्राणीवेटकंश्रंशंकिलि
किलश्चकपालिकः शवर्गः स्याद्दनचरी श्रींशंकलादिरात्रिच वांहंश्रेन।
श्रींवंचकालरात्रिश्चभीषणः लेहंनलवरीश्राःलोभवेत्स्याच्चभीषणा
महालक्ष्मीश्चहूंफ्रांडंश्रंलंपस्याच्चभीषणाः संहारभैरवश्चेतिशेषंस्वर्वव
धा॰५८ ड्ड्रेन् मूलारैलिंगनाभ्यनाहतविशुद्धिषु आज्ञाभालननलंब्रह्मरंध्रेषु
वेश्वविन्यसेत् त्रिनारमूलमेशंजेमातृकामातृभैरवं अपिपापैपरांवादे
वैनमोकाव्यापकंन्यसेत् मातृन्यासंकुलेशानिकुर्यादेवंसमाहितः ॥ १२

एवन्यस्ततनुर्द्देवि ध्यायेद्देवमनन्यधीः अमृतार्णवमध्योद्यद्रत्नद्वीपे मनोर
मे कल्पवृक्षवनान्तःस्थे नवमानिक्यमंडपे नवरत्नमये श्रीमत्सिंहासनगतां
बुजे त्रिकोणान्तःसमासीनं चंद्रसूर्यशतप्रभं अर्द्धांबिकासमाश्लिष्टं सविमर्श वि
भूषणं कोटिकंदर्पलावण्यं सदाषोडशवार्षिकं मंदस्मितमुखांभोजं त्रिनेत्रं
चंद्रशेखरं दिव्यांबरस्रगालेपं दिव्याभरणभूषितं पानपात्रं च चिन्मुद्रां त्रिशूलं
पुस्तकं करैः विद्यांसंसद्विविश्राणं सदानंदमुखेक्षणं महाघोरादिनाशेष
देवतागणसेवितं एवं विचिंत्य तं ध्यायेदर्धनारीश्वरं विभुं शुद्धरूपं वा स्मरेद्देवि
*वि॰ स्त्रीरूपं वा विचिंतयेत् अथवा निष्कलं ध्यायेत्सच्चिदानंदलक्षणं सर्वतेजोम।
यं ध्यायेत्सचराचरविग्रहं ततः संदर्शयेन्मुद्रा दशकं परमेश्वरी योनिलिं
गं च सरभिं हेतिमुद्रा च तत्परं वनमालां महामुद्रां नमोमुद्रामपि क्रमात् य

उ॰ ध्याशक्तिजपेन्मूलमंत्रंश्रीपादुकामपि मूर्ध्निसंचिंतयेद्देवंश्रीगुरुंशिवरूपि
म्रा॰ णं सहस्रदलपंकजेसकलशीतरश्मिप्रभं वराभयकराम्बुजंविमलगंधपु
१४ ष्पांबरं प्रसन्नवदनेक्षणंसकलदेवतारूपिणं स्मरेच्छिरसिसन्ततंतदभिधा
14 नपूर्वकंगुरुं एवंन्यासेकृतेदेविसाक्षात्परशिवोभवेत् मंत्रीनचात्रसंदेहोनिग्र
हानुग्रहक्षमः महाषोढान्यासंयःकरोतिदिनेदिने देवाःसर्वेनमस्यन्ति
तंनमामिनसंशयः महाषोढान्यासंयःकरोतिहिपार्वति दिव्यक्षेत्रंसमुद्दि
ष्टंसमन्तादशयोजनं कृत्वान्यासमिदंदेवियत्रतिष्ठतिमानवः तत्रस्थाहिज।
योलाभःसमान्यःश्रुणुष्वःप्रिये महाषोढाकृतन्यासस्तदंतंवेदतेयदि मासान्स्व
स्वमवाप्नोतियदिज्ञातःशिवःस्वयं दिव्यांतरिक्षभूशैलजलारण्यनिवासिनः
उद्दंडभूतवेतालदेवरक्षोग्रहादयः देवाःसर्वेपिऊर्ध्वेतिरश्चियोगीमुनीश्वराः १८

वहूनोक्तेन किं देवि नाम्नामेतेन मम प्रिये नाशुज्ञायवदेहे विनाशिष्यायश्चका
शयेत् श्रोन्नासिद्धिमवाप्नोति रहस्यन्यासमाचरेत् अस्मात्परतरा रहस्यादेवना।
भावसिद्धये लोके नास्ति न संदेहः सत्यं सत्यं वरानने उर्ध्वाम्नायश्चैवशाम्भपराश्च
साद्विंतनं महापोढापरित्तानेन नवाल्पतपसः फलं दिव्यौघेचादिनाथश्च त
त्कृतिश्च सदाशिवः तत्पत्नी वैष्णवस्तस्य भार्या रुद्रश्च तद्वयः विश्वश्च तस्त्रिया
व्रह्मानन्तकांता द्वादशेरिताः दिव्यौघे सनकश्चैव सनन्दन सनातनौ सनत्कुमा
रश्च सनत्सुजातश्च ऋभुस्तजः दत्तात्रेयो रैवतको वामदेवस्ततःपरं ततो व्या
सः शुकश्चापि एकादश समीरिताः मानवौघेन्द्रसिंहश्च महेशो भास्करस्तथा
महेन्द्रो माधवो विष्णुः षडेते परिकीर्तिताः नामान्ते योजयेद्देवि दिव्यौघैःपरमं
शिवं महाशिवं च सिद्धौघे मानवौघे सदाशिवं देवतांशरतो देवि गुरूपंक्तिश्च

रु० पूजयेत् पंक्तित्रयं क्रमेणाथ ध्यात्वा सम्यगानन्दधीः षोडशे रुपचारैस्तु सांगं
म्ना० सावरणं शिवं पूजयेन्मूलमंत्रेण गंधपुष्पाक्षतादिभिः महाषोढाञ्चितानशे
१५ षपरिवारांश्च शांभवि प्रणवादिनमोंतेन तत्तन्नाम्ना समर्चयेत् वटुमंत्रश्च वा
15 स्वामि शृणु षट्कलताधिके नामत्रयं ततो देवी पुत्राय वटुकेति च नाथः स्वा
कपिलजटाभारभास्वरपिंगल त्रिनेत्रेति पदं पश्चाज्ज्वालामुखपदं ततः इमं
पूजां बलिं गृह्ण गृह्णपावकवल्लभा उक्तो वटुमन्त्रश्च स्वरश्च नादिशाङ्गिरत्नैः व
लिदानेन संतुष्टो वटुकः सर्वसिद्धिदः शांतिं करोतु मे नित्यं भूतवेतालसेवि
तः नामत्रयं ततः सर्वयोगिनीभ्यः पदं भवेत् पश्चात्सर्वभूतेभ्यः सर्वभूतादि
वर्तिच वेदिभ्यो डाकिनीभ्यश्च शाकिनीभ्यस्ततः परं त्रैलोक्यतिपदं चैव वदा
सिनीभ्य इमां वदेत् पूजां बलिं गृह्ण गृह्ण स्वाहांतो योगिनीमंत्रः कथितोऽय १५

ॐ ले शानिपकपंचाशद्वर्णः याकाचिद्योगिनीघोरा सौम्याघोरतराप
रा खेचरी भूचरी व्योमचरी प्रीतास्तु मे सदा नारात्रयंवदेन्सर्वभूतेभ्यः सर्वप
वच पश्चाद्भूतपतिभ्यो ह्युडुकः सप्तदशाक्षरः भूताये विविधाकारा दिव्या।
भौमांतरिक्षगाः पातालतलसंस्थाश्च शिवयोगेन भाविताः ध्रुवाद्याः स
मसंध्याश्च पीठाद्याश्च शाश्वतस्थिताः ते पुत्र प्रीतमनसः प्रीताः गृह्णन्त्विमंबलिं
नारात्रयंवदेद्गृह्णियुग्मं देवि पदं ततः श्रीआपवटुकनाथाय पश्चाडुच्छिष्टहारि
णे गृह्णयुग्मं क कपं देहि क्षेत्रपालपदं ततः सर्वविघ्नान्नाशय पश्चान्नाशय हित
यततः सर्वोपचारसहितमिमं इत्थं बलिं वदेत् गृह्णयुग्मं हि वंतो यं क्षे
त्रपालमन्त्रः त्रिये वर्णः षष्ठान्तैः श्लोकः सर्वसिद्धिप्रदायकः योस्मिन् क्षेत्रनि
वासी च क्षेत्रपालः स किंकरः प्रीतो यं बलिदानेन सर्वरक्षाकरोस्तु मे नार३

उ दयाभीष्टनःपरं सिद्धार्थंवदमाभाद्यपश्चादवन्तरहृद्यं क्षेत्रपालपदंपश्चा॰ २

ऊ॰
स्वा॰
१९

यंवदेदाद्यंश्रीशासादपरामन्त्रं ह्रांह्रींह्रूंवटुगांतेथभैरवाधिष्ठितायव अ
न्तोष्मानंदतःपश्चाॅत्महाश्मशानंपदंततः मातृगणपदंपश्चात्कुलगणपदंम
वेत् सिद्धगणपदंवास्मिन्स्थानाधिपतयेततः अस्मिन्ग्रामाभिधयेस्मिन्दे
शाधिपतयेततः मेघनादंपश्चात्प्रचंडेशायपदंभवेत् कृपाणंभीमतत्पश्चाद्दी
घणिंतिपदंभवेत् स्यात्सर्वविद्याधिपतये इमांपूजांबलिवत् गृह्णागृह्णमंतगु
गंगु रुवर्णायगुरुमकं ज्वलगुज्वलज्वलगुगं सर्वविघ्नंनिवारय नाशयह्रिंत।
येतांक्षोतनत्पश्चात्तनमितीरयेत् क्षेत्रपालायवौषडेषस्पूजनरशनाम्नरः नार
त्रयेवदेपश्चादस्तुकक्षेत्रपालच राजाराजेश्वरइमांपूजांबलिमनःपरं गृह्णा
गृह्णमेह्रिंठांतोर्ऐरष्टाविंशतिभिःस्मृतः अनेनबलिदानेनवटुवर्गसमन्वि
तः राजराजेश्वरोदेवोमेप्रसीदतुसर्वदा पश्चिमेवटुकेदेवमन्त्रेरयोगि।

१९

नीवलिं एवं भूतवलिं दद्यात्क्षेत्रपाले च दक्षिणे राजराजेश्वरं मध्ये पूजये।
कल्पनायिके अंगुष्ठानामिकाभ्यां तु वटुकस्य बलिः स्मृतः तर्जनीमध्यमाना
मिकांगु`` योगिनीबलिः अंगुलीभिस्तु सर्वाभिः कर्तव्यो भूतबलिः प्रिये अंगु
ष्ठतर्जनीभ्यां तु क्षेत्रपालबलिर्भवेत् अंगुष्ठमध्यमाभ्यां तु राजराजेश्वरस्य च
अथ षडङ्गयोगः तत्र प्रातः कृत्यादि मातृकान्यासांते शिरसि ब्रह्मणे ऋषये न
ईं मः मुखे जगतीछंदसे हृदि श्रीमदर्द्धनारीश्वराय देवतायै नमः इति विन्या
स्य महाषोढान्यासे विनियोगः इति कृतांजलिः कराङ्गुष्ठयोः ऐं ह्रीं श्रीं ह्सौं
ह्सौं ईशानाय नमः तर्जन्योः ह्सौं ह्सैं तत्पुरुषाय मध्यमयोः ह्सुं ह्सिं वामदे
वाय॰ पादयोः सद्योजाताय॰ मूर्ध्नि ह्सां ह्सौं ईशानायोर्द्ध्ववक्त्राय॰ मुखे
ह्सैं ह्सैं तत्पुरुषाय पूर्ववक्त्राय॰ दक्षिणे ह्सुं अघोराय दक्षिणवक्त्राय॰ वा
द ह्सुं

ऊ॰ मकर्णौ ह्लिं ह्लिं वामदेवायोनरवक्त्राय घोरकृपेह्लं ह्लं सद्योजातायपश्चि
न्ना॰ मवक्त्रायनमः इति श्रेगन्यासः क्रमेणांगुष्ठादिपंचांगुलिभिरेकैकां रसै
१७ कैकवक्त्रेन्यसेत्ततः ह्लां ह्लीं इत्यादिनाकरषडंगन्यासं कृत्वा प्रणम्यो
17 क्तं देवं ध्यात्वा न्यसेत् नवादीपपंचन्यासो यथा ४ ह्लौः ह्लैंः श्रंश्रपंचरूपायै
मायायैनमः श्रियैनमः पच ८ श्रांह्लिपद्मरूपायै ८ ईंजलधिरूपायैकमलायै ८ ईंगिरिरूपा रि
यैविस्ववल्लभायै ८ उंपंननरूपायैपद्मधारिण्यै · ऊंपीठरूपायैसमुद्रत
नयायै ऋंत्तेत्ररूपायैलोकमात्रे ८ ऋंवनरूपायैकमलवासिन्यै लृंआश्र
मरूपायैइंदिरायै लॄंगुहरूपायैमायायै एंनदीरूपायैरमायै ऐंचत्वरक
पायैपद्मायै ओंउद्भिजरूपायैनारायणप्रियायै · औंस्वेदजरूपायैसि
द्धलक्ष्म्यै · अंअंडजरूपायै राजलक्ष्म्यै अः जरायुजरूपायैमहालक्ष्म्यै · १७

कं कलरूपायै आर्यायै खं त्रुटिरूपायै उमायै गं कलारूपायै चण्डिकायै घं
काष्ठारूपायै दुर्गायै ङं निमेषरूपायै शिवायै चं श्वासरूपायै अपर्णायै
छं घटिकारूपायै अम्बिकायै जं मुहूर्तरूपायै सत्यै झं प्रहररूपायै ईश्वर्यै
ञं दिनरूपायै शाम्भव्यै टं संध्यारूपायै ईशान्यै ठं रात्रिरूपायै पार्वत्यै डं ति
सर्व थिरूपायै मंगलायै ढं वाररूपायै दाक्षायिण्यै णं नक्षत्ररूपायै हैमवत्यै तं यो
गरूपायै महामायायै थं करणरूपायै महेश्वर्यै दं पक्षरूपायै मृडान्यै धं न्यै
मासरूपायै रुद्राण्यै नं राशिरूपायै शर्वाण्यै पं ऋतुरूपायै परमेश्वर्यै
फं अयनरूपायै काल्यै बं वत्सररूपायै कात्यायन्यै भं युगरूपायै गौर्यै
प्र मं प्रलयरूपायै भवान्यै यं पञ्चभूतरूपायै ब्राह्म्यै रं पञ्चतन्मात्रारूपायै वागी
यरू श्वर्यै लं पञ्चकर्मेन्द्रियरूपायै वाराह्यै वं पञ्चज्ञानेन्द्रियरूपायै सावित्र्यै शं

शु॰
स्त्रा॰
१८
18

वशाणत्रूपायै सरस्वत्यै बं उणात्रयरूपायै गायत्र्यै सं अं अंतःकरणचतु
ष्टयरूपायै हं अवस्थात्रयरूपायै शारदायै लं समयात्रूपायै भारत्यै
हं सोमत्रयरूपायै विद्यात्मिकायै नमः इति मातृकास्थानेषु विन्यस्य ऐं
ह्रीं श्रीं हैं ह्सौः अं ५॰ सकलप्रपंचाधिदेवतायै श्रीपरांबादेव्यै नमः ह्सौः
ह्सौः श्रीं ह्रीं ऐं ॐ नमः इति सर्वांगे व्यापकं कृत्वा इति प्रपंचन्यासः अथ
भुवनन्यासः तत्र पादयोः ॐ ऐं ह्रीं श्रीं ह्स्रौं ह्सौः अं आं इं अतललोकनि
लयशतकोटिगुह्याद्ययोगिनीमूलदेवतायुताधारशक्त्यांबादेव्यै नमः
गुल्फयोः ९ ईं उं ऊं वितललोकनिलयशतकोटिगुह्यतरअनंतयोगि
नीमूलदेवता जंघयोः ९ ऋं ॠं लृं सुतललोकनिलयशतकोटिसति
गुह्याचिंत्ययोगिनीमूलदेवतायुतजान्वोः ९ लॄं एं ऐं महातललोका। १८

निलयशतकोटिमहागुह्यस्वतंत्रयोगिनीमूल ऊर्ध्वे:९ ओंओंनलात
ललोकनिलयशतकोटिपरमगुह्येच्छायोयोगिनीमूलास्फिचोः अग्र:
रसातललोकनिलयशतकोटिरहस्यज्ञानयोगिनीमूलाधारे ९ कं पं पा
तालललोकनिलयशतकोटिरहस्यतरक्रियायोगिनी स्वाधिष्ठाने ९ चं १
भूर्लोकनिलयशतकोसतिरहस्यडाकिनीयोगिनीमूलं मणिपूरके ९ ठं ५
भुवर्लोकनिलयशतकोटिमहारहस्यराकिनीमूलं अनाहते ९ नं १ स्वर्लो योगिनी
कनिलयशतकोटिपरमरहस्यलाकिनीयोगिनीमूलं विशुद्धे ९ पं मह
हर्लोकनिलयशतकोटिगुप्तकाकिनीयोगिनीमूलं आज्ञायां ९ पं ८ ज
नलोकनिलयशतकोटिगुप्तरसाकिनीमूलं ललाटदेशे ८ तपोलोकनि योगिनी
लयशतकोटिगुप्तमहाकिनीयोगिनीमूलं ब्रह्मरंध्रे ८ हं सत्यलोकनिल

ऊ॰ म्ना॰ १९ यशतकोटिमहागुप्तयोगिनीमूलदेवताधारशमंवादेव्यै नमः इति
विन्यस्य ५ ॐ ५॰ सकलभुवनाधिपायै श्रीपरादेव्यै नमः स्हौं ह्सौं: श्रीं ह्रीं ऐं
ॐ इति व्यापकं ऊर्ध्वादि त्रिभुवनन्यासः अथ मूर्तिन्यासः तत्र शिरसि ५ अं
19 केशवाय अनन्तरूपायै नमः मुखे ५ आं नारायणाय ईशान्यै दक्षांसे ५ इं मा
धवाय हृदायै वामांसे ५ ईं गोविन्दाय ईशानायै दक्षपार्श्वे ५ उं विष्णवे उग्रा
यै वामे ऊं मधुसूदनाय ऊर्ध्वनयनायै दक्षकट्यां ५ ऋं त्रिविक्रमाय स्कन्दा
वामभ्यां ॠं वामनाय रूपिण्यै दक्षोरौ लृं श्रीधराय लक्ष्म्यै वामोरौ लॄं हृषी
केशाय सन्तोषायै दक्षजानुनि एं पद्मनाभाय एकनायिकायै वामजानुनि ऐं दा जानुनि
मोदराय एकाकिन्यै दक्षजंघायां ओं वासुदेवाय पावन्यै वामजंघायां औं सं जंघा
कर्षणाय ऊर्ध्वकायै दक्षपादे अं प्रद्युम्नाय जनप्रभायै वामे अः अनिरुद्धाय १९

स्थिमालाधारिण्यै दक्षपादाग्राद्यमूलपर्यन्तं ९ कंभं भवाय करमद्वायै वा
मपादाग्राद्यमूलपर्यन्तं खंबं शर्वाय खगलायै दक्षपार्श्वे गंफं रुद्राय गरि
मलप्रदायै वामपार्श्वे घंपं पशुपतये घोरपादायै दक्षदोर्मूले ङंनं उग्राय प
नाम्न्यै वामदोर्मूले चंधं महादेवाय चन्द्रार्द्धधारिण्यै कंठे छंदं दोर्मध्ये वदने
जंथं ईशानाय जगत्स्थानायै दक्षकर्णे झंतं तत्पुरुषाय झंकृत्यै वामे ञंणं अ
घोराय ज्ञानदायै भाले टंढं सद्योजाताय टंकारवक्त्रायै शिरसि ठंडं वामदे
वाय ठंकृतिरामयै मूलाधारे यं ब्रह्मणे पद्मिन्यै स्वाधिष्ठाने रं जनार्दनाय जनये
रंजिन्यै मणिपूरके लं वयमेलक्ष्म्यै अनाहते वं परमेष्ठिने वज्रिण्यै विशुद्धौ
शं पितामहाय शशिधरायै आज्ञायां षं विद्यायै षडायतनालयायै श्रीं हं दीमस
विरंचये सर्वनायिकायै गेयिन्यां हंसः छे हरिमितानननायै नादे लंब तत्पाना।

कु॰ नायललितायैनादांते त्रेह्रिरण्यगर्भायः तमायैनम इत्येवं विन्यस्य ॐ ऐं
मन्त्रा॰ ह्रीं श्रीं ह्लौं स्हैं: सकलह्रियमूर्त्यात्मिकायै श्रीत्रिपुरांबादेव्यै नमः ह्सौं: ह्लौ: श्रीं
२० ह्रीं ऐं श्रीं इति व्यापककरणादिति मूर्तिन्यासः अथ मंत्रन्यासः तत्र मूलाधारे
20 ॐ अं आं इं ईं पञ्चलक्षकोटिभेदब्रह्माण्डाद्येकाक्षरात्मकाखिलमंत्राधिदेवतायै
सकलफलप्रदायै द्विकूटे सर्वेश्वरादेव्यौ: मणिपूरके ॐ उं ऊं त्रिलक्षकोटिभे
दब्रह्मादित्र्यक्षरात्म त्रिकूटेश्वर्यंबादेव्यै अनाहते ऌं ॡं एं ऐं चतुर्लक्षकोटिभेदव
ह्न्यादिचतुरक्षरात्म चतुःकूटेश्वविशुद्धौ ओं औं अं अः पंचलक्षकोटिभेदह्लयी
रिपंचाक्षरात्म पंचकूटे आज्ञायां कं खं गं घं षट्लक्षकोटिभेदसादिषडक्षरा
त्म॰ षट्कूटे बिंदौ ङं चं छं सप्तलक्षकोटिभेदगणपत्यादिसप्ताक्षरात्मसप्तकूटे अर्द्धें
दौ जं झं ञं अष्टलक्षकोटिभेदवटुकाद्यष्टाक्षरात्म अष्टकूटेश्वरीपिन्यां अं टं ठं २॰

नवलक्षकोटिभेदब्रह्मादिनवाक्षरात्मनवकूटे नादे ॐ फं णं दशलक्षको
ना टिभेदविष्ण्वादिदशाक्षरात्मदशकूटे नादान्ते नें थें दं एकादशलक्षकोटिभे
दरुद्राद्येकादशाक्षरा एकादशकूटे शक्तौ यं नं पं द्वादशलक्षकोटिभेदवा
राह्यादिद्वादशाक्षरा द्वादशकूटे व्यापिकायां फं वं भं त्रयोदशलक्षकोटिभेद
लक्ष्म्यादित्रयोदशाक्षरे त्रयोदशकूटे समनाख्ये मं यं रं चतुर्दशलक्षकोटि
भेदगौर्यादिचतुर्दशाक्षरात्मा चतुर्दशकूटे उन्मन्यां लं वं शं पंचदशलक्ष
कोटिभेददुर्गादिपंचदशाक्षरा पंचदशकूटे ध्रुवमंडले खं सं हं लं क्षं षोड
लक्ष शकोटिभेदत्रिपुरादिषोडशाक्षरात्मकाखिलमंत्राधिदेवतायै षोडशा
कूटे श्रीपरांबादेव्यै नमः इति विन्यस्य ॐ ऐं ह्रीं श्रीं ह्सौः स्हौः श्रीं ॥ ४ ॥ सकलमंत्रा
धिदेवतायै श्रीपरांबादेव्यै नमः स्हौः ह्सौः श्रीं ह्रीं ऐं श्रीं इति व्यापकं कुर्यादि

कु. तिमंत्रन्यासः नमः दक्षपादे ६ ग्रं ग्रां सहस्रकोटिऋषिकुलसेवितायै नि
न्त्रा. त्यं वा देव्यै नमः वामे ६ ईं ईं सहस्रकोटियोगिकुलसेवितायै प्रतिष्ठां वा देव्यै
२१ दक्षगुल्फे उं ऊं सहस्रकोटितपस्विकुलयैविद्यांवा· वामे ऋं ॠं सहस्रकोटि
21 नेनकुलसेवितायै शांतं वा देव्यै दक्षजंघायां लृं ॡं सहस्रकोटिमुनिसेवि
तायै शांत्यतीतां देव्यै वामायां एं ऐं सहस्रकोटिदेवतकुलसेवितायै हृल्ले
खां वा देव्यै दक्षजानुनि ओं औं सहस्रकोटिराक्षसकुलदेवतायै गगनां वा दे
व्यै वामे अं अः सहस्रकोटिविद्याधरकुलसेवितायै रक्तां वा देव्यै दक्षोरौ कं खं
सहस्रकोटिअप्सरकुलसेवितायै जयां वा वामोरुमूले छं जं सहस्रकोटिगं
धर्वकुलसेवितायै जयंतां वा: दक्षपार्श्वे जं कं सहस्रकोटिगुह्यककुलसेवि
तायै अजितां वा देव्यै वामे टं ठं सहस्रकोटियक्षकुलसेवितायै अपराजितां २१

वादेव्यै दक्षस्तने ङंढंसहस्रकोटिकिन्नरकुलसेवितायै वामांगांवा वामे णं
तंसहस्रकोटिपन्नगकुलसेवितायै ज्येष्ठांवादेव्यै दक्षदोर्मूले थंदंसहस्रको
टिपितृकुलसेवितायै रौद्रींवादेव्यै वामे धंनं सहस्रकोटिगणेश्वरसेविता
यै मायांवादेव्यै दक्षभुजे पंफंसहस्रकोटिभैरवकुलसेवितायै कुंडलिनींवा
देव्यै वामे बंभंसहस्रकोटिवटुककुलसेवितायै कालींवादेव्यै दक्षांसे मंयं
सहस्रकोटिक्षेत्रेशकुलसेवितायै कालरात्रींवादेव्यै वामे रंलं सहस्रकोटिप्र
थमकुलसेवितायै स्ववाकल्पांवादेव्यै दक्षकर्णे वंशंसहस्रकोटिब्रह्मकुल
सेवितायै सर्वेश्वरींवादेव्यै वामे षंसंसहस्रकोटिविष्णुकुलसेवितायै स
र्वेशांवादेव्यै भाले हंलंसहस्रकोटिरुद्रकुलसेवितायै सर्वकल्पांवादेव्यै ब्र
ह्मरंध्रे ९ लंसहस्रकोटिचराचरकुलसेवितायै कुलशक्तिंवादेव्यै नमः इति वि

कु० मस्त ६ ग्रं ५० समस्तदेवनाथिपार्यैवादेव्यै नमः सहौंः स्हौंः श्रीह्रींऐंश्रों
मा० इतिव्यापकं ऊर्ध्वादि दिनि देवनन्यासः अथमातृकान्यासः तत्रमूलाधारे ९
२२ कं ४ अनंतकोटिभूचरीकुलसहितायै ग्रांह्रांमंगलांबादेव्यै ग्रांह्रांब्रह्मा
22 ऐंयंबादेव्यै अनंतकोटिभूतकुलसहिताय ग्रंह्रंमंगलनाथाय ग्रंह्रंअसि
तांगभैरवायनमः स्वाधिष्ठाने ६ वं ४ अनंतकोटिखेचरीकुलसहितायै
ईंलांरविकांबादेव्यै ईंलांमाहेश्वर्यैबादेव्यै अनंतकोटिवेतालकुलसहि
ताय यंलंरविकनाथाय ईंलंरुरुभैरवाय मणिपूरके ४ अनंतकोटिपा
तालचरीकुलसहितायै ऊंह्रांयोगेश्वर्यैबादेव्यै ऊंह्रांकौमार्यैबादेव्यै अनं
तकोटिपिशाचकुलसहिताय ऊंह्रंयोगेश्वरनाथाय ऊंह्रंचंडभैरवाय अना
हते ९ तं ४ अनंतकोटिदिक्चरीकुलसहितायै ऋंसांहरसिद्धांबादेव्यै: २२

रंसां वैसवंवादेव्यै अनंतकोसापस्मारकुलसहिताय रंसंहरसिद्धनाथा
य रंसंक्रोधभैरवायविष्णुर्हां १ पं ४ अनंतकोटिसहचरीकुलसहितायै
हंषांमहेन्द्रीवादेव्यै हंषांवराहींवादेव्यै अनंतकोटिब्रह्मराक्षसकुलसहि
ताय स्तंषंभद्रिनाथाय स्तंषंउन्मत्तभैरवाय आत्तायां १ यं १ अनंतकोटिसिद्धि
वरीकुलसहितायै यैंशंकिलिकिलेवादेव्यै यैंशंरुद्राणीवादेव्यै अनंतको
टिगिरिवेटककुलसहितायै यंशंकिलिकिलनाथाय यंशंकपालिभैरवाय
भाले १ शं १ अनंतकोटिवनचरीकुलसहितायै श्रौंवंकालराज्ञीवादेव्यै
श्रौंवंचामुण्डावादेव्यै अनंतकोटिप्रेतकुलसहिता श्रौंवंकालशक्तिना
थायै श्रौंवंभीषणभैरवायब्रह्मरंध्रे १ लंतंअनंतकोटिजलचरीकुलस
हितायै ग्रंःलंभीषणावादेव्यै ग्रंःलंमहालक्ष्मीवादेव्यैअनंतकोटिकूष्माण्ड

त्रु· ॐ लंसहितायै ग्लं लं भीषणनाथाय ग्लं लं संहारभैरवाय नमः इति विन्यस्य
मा· ८ ग्रं ५० समस्तमातृभैरवाधिदेवतायै श्रीपरावादेव्यै नमः ह्रौं ह्सौं श्रीं ह्रीं
२२ ऐं ॐ इति व्यापकं कुर्यादिति मातृकान्यासः इति महाषोढान्यासः ततः सर्व
वक्त्रषडंगन्यासं विधाय सर्वात्मकरूपं देवं स्वभावेन ध्यात्वा योनिलिंगयेत्तुक
पालखट्वांगत्रिशूलडमरुकवनमालानमस्कारमहामुद्राद्याद्दशमुद्राविरच्य
शिरसि श्रीगुरुं सहस्रदलपंकजे इत्यादि श्लोकात्मकरूपं ध्यात्वा तद्दिव्यानता
डकां शिरसि विन्यस्य प्रणम्य संकेतनाममूलाधारे विन्यस्य शिवरूपमा
त्मानं ध्यात्वा महाषोढान्यासमाहात्म्यं सर्वात्मकं स्मरेदिति महाषोढान्यासं वि
धाय योगपीठन्यासांते मूलेन प्राणायामत्रयं कुर्यात् शिरसि ब्रह्मणेऋ
षये नमः मुखे जगतीछंदसे हृदि श्रीमदर्धनारीश्वरायदेवतायै नमः इति २२

23



विन्यस्य ह्रां ह्रीं मित्यादिना करषडंगन्यासं कृत्वा प्रणामोक्तरूपं देवं ध्या
त्वा मानसोपचारैः संपूज्य त्रिकोणगर्भमष्टदलकमलं कृत्वा तद्बहिः षट्
विंशतिदले तद्बहिः षोडशदलं तद्बहिरष्टत्रिंशद्दलं तद्बहिश्चतुर्दशदलं
तद्बहिरेकपंचाशद्दलमिति एतच्चक्रं वज्ररसोपेतं निर्माय तत्रमूलेन पुष्पां
जलिं दत्वा आवाहनादिस्थापनादिषु उपचारान्ते ह्रां ह्रीं मित्यादिना षडंगं
संपूज्य त्रिकोणाष्टदलयोरंतराले यक्षियेण्णो धौम्राय गुरुतदिक्षु विद्यमान।
वक्रमेण ध्यात्वा प्रथमरेखायां दिक्षु हेमः परात्रिभ्यो गुरुभ्यो नमः इति पु
ष्पांजलिं दत्वा ॐ ऐं ह्रीं श्रीं इत्यादिना श्यपरशिवाय नमः एवं ब्रह्मदिशाक्तिपर
शिवायै ४ सदाशिवपरशिवाय ४ सदाशिवापरशिवायै ईश्वरपरशिवाय
ईश्वरीपरशिवायै रुद्रपरशिवाय रुद्राणीपरशिवायै विष्णुपरशिवाय वैष्ण



कु॰ वीपरशिवाय ब्रह्माणीपरशिवायैनमः इति इति संपूज्य द्वितीयरेखायां
म्ना॰ सिद्धौघेभ्यः पराख्येभ्यो गुरुभ्यो नमः ॐ ऐं ह्रीं श्रीं सनकमहाशिवाय नमः ४
२४ सनंदनमहाशिवाय ४ सनातनमहाशिव ४ सनत्कुमारमहाशिवाय स
24 नत्सुजातमहाशिवाय ऋभुमहाशिवाय दत्तात्रयमहाशिवाय रैवतकम
हाशिवाय वामदेवमहाशिवाय व्यासम शुकमहाशिवायनमः इति संपूज्य
तृतीयरेखायां ४ मानवौघेभ्यः पराख्येभ्यो गुरुभ्यो नमः इति त्रयांजलिं दत्वा
नृसिंहमहाशिवाय महेशमहाशि॰ भास्करमहा॰ महेन्द्रमहाशिवाय मा
धवमहा॰ विष्णुमहाशिवायनमः इति संपूज्य ततः सर्ववाह्यगतैकपंचाश
द्दलकमले ४ एकपंचाशद्दलपद्मायनमः इति त्रयांजलिं दत्वा ततो देवं
अग्रदलमारभ्य ॐ ऐं ह्रीं श्रीं क्लीं ह्सौः अं अपंचरूपायै श्रियै नमः ८ अं ह्रीं पंचरूपा २०

येस्वायायै नमः पवं प्रपंचन्यासोक्तैकपंचाशद्देवतावामावर्तेन संहृत्य ९
ॐ ऐं ह्रीं श्रीं ह्स्रौंः स्हौः ॐ ५ सकलप्रपंचाधिदेवतायै परांबादेव्यै नमः स्हौः।
ह्स्रौंः श्रीं ह्रीं ऐं ॐ इति पुष्पांजलिं दत्वा ९ अभीष्टसिद्धिमित्यादिश्लोकं पठित्वा
पुष्पांजलिं दत्वा प्रपंचदेवतामध्यस्थाय श्रीमदर्द्धनारीश्वरायनमः इति प्रणा।
मेत् ततस्त्वर्दशद्दलपद्मायनमः इति पुष्पांजलिना संहृत्य देवाग्रमारभ्य ९
ॐ श्रीं ह्रीं अतललोकनिलये मादिशक्त्यंबादेव्यै नमः इत्येवं प्रपंचन्यासोक्तचतु
र्दशदेवतावामावर्तेन संहृत्य ९ समस्तमातृकास्वरूपायै सकलप्रपंचाधि
पायै श्रीपरांबादेव्यै नमः स्हौः ह्स्रौंः श्रीं ह्रीं ऐं ॐ इति पुष्पांजलिं दत्वा प्राग्व।
द्वितीयावरणपूजां समर्प्य ततः ९ अष्टत्रिंशद्दलकमलायनमः इति पुष्पां
जलिं दत्वा ९ ॐ केशवाद्यात्तरशक्तयेनमः इत्यादिमूर्तिन्यासोक्ताष्टत्रिंशद्देव

पु० तावामावर्तेन संपूज्य ९ ग्रं ५० सकलत्रिमूर्त्यात्मिकायै श्रीपरावादेव्यै नमः

मू० ह्स्रौंः ह्स्लौंः श्रीं ह्रीं ऐं इति पुष्पांजलिं दत्वा प्राग्वत्तनीयावरणं इत्येतां समर्प्य ततः

२५ षोडशदलपद्मायतनम इति प्राग्वत्संपूज्य तर्प्येव ९ ग्रं ग्रां इयं पकलतत्त्वकोटि

25 भेदरूपादिप्रकृष्टे स्वयंवादेव्यै नमः इत्येवं वामावर्तेन षोडशदेवताः सं

प्रदायाम्नायाः संपूज्य ९ ग्रं ५० सकलमंत्राधिदेवतायै नमः ह्स्रौं ह्स्लौंः श्रीं ह्रीं ऐं ॐ

इति प्राग्वत्संपूज्य प्राग्वत्तनीयावरणं समर्प्य षट्त्रिंशतिदलपद्मायतनम इति

पुष्पांजलिं दत्वा ९ ग्रं ग्रां सहस्रकोटीत्यादि निहृतं संवरदेव्यै नम इति देवतत्त्वा

म्नायाः षट्त्रिंशतिदेवताः संपूज्य ९ ग्रं ५० समस्तदेवताधिपायै श्रीपरावादे

व्यै नम इति प्राग्वत्संपूज्य प्राग्वत्संवमावरणं समर्प्य ततः ९ अष्टदलकमला

यतनम इति प्राग्वत्संपूज्य ९ ग्रं ५० अनंतकोटिभूवरीत्यादि श्रमितांगभैरवाय। २५

नमः मेवं मातृकाभ्यामोङ्काराष्टदेवताः संपूज्य ९ सं ५० समस्तमातृभैरवा
धिदेवतायै श्रीपरांबादेव्यै नमः इति पुष्पांजलिं दत्वा प्रागवत्षष्ठावरणे सम
र्च्य ततश्चतुरस्रे लोकपालान्दशाशास्वेव संपूज्य धूपादि विधाय तिलहोमां
ते पूजाचक्रस्य पश्चिमभागे चतुरस्रं त्रिकोणात्मकं मंडलं विरच्य तत्र वटु
कमंत्रेण तमावाह्य गंधाद्यैरुपचारैः संपूज्य तत्समांसांजनजलपूर्णं साधारे
बलिपात्रं निधाय ऐं ह्रीं श्रीं देवीपुत्रवटुकनाथ पिंगलनेत्र भार भास्वर पिंगल
त्रिनेत्र ज्वालामुख एहि मां पूजां बलिं गृह्ण गृह्ण स्वाहा इति मंत्रेण वामांगुष्ठानामि।
काभ्यां मत्स्योदकधारादानेन बलिमुत्सृज्य बलिदानेन संतुष्ट इत्यादि मंत्रेण पु
ष्पांजलिं दत्वा अनेनैव मंडलं कृत्वा योगिनीमंत्रेणानयैव संपूज्य तत्र प्रा
ग्वद्बलिपात्रं निधाय ऐं ह्रीं श्रीं सर्वयोगिनीभ्यः सर्वभूतबलिनीवीरनेभ्यो

का

कु॰ डाकिनीभ्यः शाकिनीभ्यस्त्रैलोक्यवासिनीभ्यः इमं सङ्गं बलिं गृह्ण गृह्ण स्वाहे॰
स्त्रा॰ तिवामतर्जनीमध्यमानामांगुष्ठैर्योन्याकारेण पूर्ववद्बलिमुत्सृज्य याकाचि
२९ द्योगिनी घोरे इति मंत्रेण पुष्पांजलिं समर्प्य ततः पूर्ववत्तथैव मंडलं विधाय तत्र
26 सर्वभूतमंत्रेण पूर्ववद्वज्र्यादिभिः संपूज्य तत्र बलिपात्रं निधाय ऐं ह्रीं श्रीं सर्व
भूतेभ्यः सर्वभूतपतिभ्यो नमः इति मंत्रेण वामांगुलिभिः प्राग्वद्बलिमुत्सृज्य
भूताये विविधाकारा इति मंत्रेण पुष्पांजलिं दत्वा ततो दक्षिणे तथैव मंडलं
कृत्वा तत्र क्षेत्रपालमंत्रेण संपूज्य प्राग्वद्बलिपात्रं निधाय ॐ ऐं ह्रीं देहि देवी
पुत्राय वटुकनाथाय उच्छिष्टहारिणे गृह्ण गृह्ण रुरु क्षेत्रपाल सर्वविघ्ना
न्नाशय सर्वोपचारसहितामिमां सङ्गं बलिं गृह्ण गृह्ण स्वाहेति मंत्रेण
वामांगुष्ठतर्जनीभ्यां पूर्ववद्बलिमुत्सृज्य यो ऽस्मिन्क्षेत्रनिवासी चेति मंत्रे २९

पुष्पांजलिं समर्प्याथवा ऐं श्रीं ह्रीं ह्सौंः ह्रां ह्रीं ह्रूं ह्रां ह्रीं ह्रूं भैरवाधिष्ठिताय तोभ्या
नंदोदयाभीष्टसिद्ध्यर्थं मवतरावतर क्षेत्रपाल महाशास्त्रमान्त्रपुत्रकुलपुत्रास्मि
हपुत्रास्मिन्स्थानाधिपतये अस्मिन्ग्रामाधिपतये अस्मिन्देशाधिपतये मेघ
नादप्रचंडोग्रकृपाणभीमभीषणसर्वविघ्नाधिपतये इमं सर्जो बलिं गृह्ण गृ
ह्ण हन हन मुरु हन चूर्णय चूर्णय ज्वल ज्वल प्रज्वल प्रज्वल सर्वविघ्नान्निवारय नाश
य नाशय ह्रां ह्रीं ह्रूं क्षेत्रपालाय वौषट् हूं इति मंत्रेण वाद्यवंवद्धलिपुनस्त्रेन
तन आग्नेयकोणे प्रागुक्तमंडले राजराजेश्वरमावाह्य गंधादिभिः संपूज्य तत्र
प्रागवद्धलिपात्रे निधाय ऐं ह्रीं श्रीं अमुक क्षेत्रपाल राजराजेश्वर इमं सर्ज्जो बा
लिं गृह्ण गृह्ण स्वाहेति मंत्रेण गृह्णमध्यमाभ्यां महोदकधारादानेन बलिपु
रस्कृत्य तेन बलिदानेनेति मंत्रेण पुष्पांजलिं दत्वा नीरांजनादिकं शेषं प्रागवत्समा

कृ. पयेदिति तथा मंत्री विशुद्धहृदयः पूर्वोक्तनियमान्वितः श्रीप्रासादपरामंत्रेण
क्रा. लक्षं जपेत्प्रिये दशांशं जुहुयाद्देवि संस्कृते हव्यवाहने गंधपुष्पाक्षतैस्तथाकल्प
२७ येद्वस्त्रादिभिः प्रिये भक्ष्यभोज्यान्नपानाद्यैः कुलद्रव्यैर्मनोहरैः तोषयेद्योगि
27 नीवृंदं यथाविभवविस्तरं एवं न्यासजपध्यानसहोमार्चनतर्पणैः मंत्री सि
द्धमंत्रो देवि साक्षात्परशिवो भवेत् ततः समस्तमभीष्टानां प्रयोगान्कलनाथि
के मंत्रेणानेन मतिमान्साधयेत्सुकृतिस्तुकये सिद्धमंत्रस्य सिद्ध्यंति षट्कर्माणि
न संशयः नैव सिद्ध्यंत्यसिद्धस्य देवताशापमाशुयात् काम्यप्रयोगकर्तृणां प प
रलोके न विद्यते प्रयोगसिद्धिरेवैषां फलमन्यत्र च प्रिये एकस्यापि विधान
स्य न कृत्वापि फलं दृढं देवेशि दृश्यते तस्मात्त्रिः कामो देवतां भजेत् होम
तर्पणयंत्राद्यैर्नानाध्यानविशेषकैः आत्मनश्च परस्यापि षट्कर्माणि समा २७

चरेत् प्रयोगांते व कृत्स्नां तिथिं नैव समाचरेत् पंचलक्षं जपेन्मंत्रं ध्यानन्यास
समन्वितः प्रयोगदोषशांत्यर्थं आत्मरक्षार्थमेन च नचेत्फलं चनाप्नोति देव
नाशाय समाप्नुयात् तिथिवारनक्षत्रकरणं योगमासर्तुपक्षकं द्वीपेशकूर्मचक्रादि
ज्ञात्वा कर्माणि साधयेत् पंचशुध्यासनं प्राणामंत्रन्यासाक्षमालिकाः दोषसं
स्कारमुद्रादीन् ज्ञात्वा मंत्राणि साधयेत् द्विषड्दोषवदारख्यराशिवर्णानुकूल
ता भूतमैत्रीमथाद्यं तं ज्ञात्वा मंत्राणि साधयेत् मंत्रविद्याभेदं निद्रा बोधायाग्नी
सोमस्वरूपकं पुंस्त्रीनपुंसकादिं ज्ञात्वा मंत्राणि साधयेत् ग्रथनाम्नादिग्र
णिनाडीन्ज्ञात्वा तु संगतिं देवताकालमुद्रादीन् ज्ञात्वा कर्माणि साधयेत् साध्या
साधककर्माणि लेखने द्रव्यपंचकं स्थानं यंत्रप्रमाणं च ज्ञात्वा यंत्राणि साध
येत् उन्मनिरमनावर्णमूर्तिसंस्कारसंस्थितिं ॐ उद्रव्यप्रमाणादीन् ज्ञात्वा

कु॰ स्ता॰ २८ 28

होमं समाचरेत् यामप्रभास्मवर्णोघ निर्गंधाशिखाकृतिं हृतवेशादिकं लक्ष
णाकथयेत् कुम्भास्तम्भं मंत्रजलवाक्षसंधाने देहावेशादिलक्षणं मंत्रोच्चारण
भेदं वक्षालक्षमंत्राणि साधयेत् मंडले कालशक्ताध्यौरकेगंधाष्टकादिकं दी
क्षानामप्रदानादिक्षालक्षारीलां समाचरेत् निसंनैमित्तिकं काम्यं नियमेनाम।
वासनो पूजा धारणं यंत्रो दिक्षालक्षकर्माणि साधयेत् पूजा गृह प्रवेशादि कुल
पूजकलक्षणं कुलद्रव्यादिसिद्धिं वक्षालक्षपूजा समाचरेत् अंतर्यागं बहिर्या
गमर्घ्यादिस्थापनार्चनं पंचमुष्टांगलिंदे वि ज्ञानाश्रपूजां समाचरेत् पात्राधा
रादिपिशितं कुलमेलननर्पणं वटुकादिबलिंदे वि ज्ञानाश्रपूजां समाचरेत्
कुलाकुलात्वसहजाशक्तिभेदं वलक्षणं शुभलक्षणसंयुक्तं स्त्रीसंस्काराचे
नादिकं देवि संभोगकाले वक्षालक्षशक्तिपरिग्रहेत् इत्याद्याः कथिताः के। २८

विद्विशेषाः क्रूलनादिके सर्वेषामपि मंत्राणां विधिः साधारणक्रमः मंत्राः
फट्देवता हूंफट्ंताः प्राणे वदन्तितो प्रवृध्यंते द्विठांताः सर्वविधाः ह्रीदेव
ताः प्रिये वामे प्राणे प्रवृध्यंते नमोंताः स्तंभकाः नाडीद्वयगमे प्राणे सर्वे
वीयं प्रयान्ति च शांतिमनवः सौम्याभूयिष्ठानमस्ताद्राः स्वाहांताः सर्ववि
धन्स्ता ताग्नेयाः क्रूरकर्मसु फट्स्वाहा वषट् हुंफट् हूं द्वेषे सर्वचमारणे स्तंभ
ने च मनः प्रोक्ते स्वाहा शांतिकपौष्टिके होमतर्पणयोः स्वाहा न्यासमन्त्रयो
र्नमः मंत्राणां योजयेन्मंत्री जपकाले यथास्थिते शांतिके रामते ते नास्त्रभूर्जे
पत्रे तु वश्यके सर्वकार्येषु सौवर्णे क्रूरे स्यात् लेतकर्पटे त्रिगंधे शांतिके श्री
खंडे पंचगव्येन तु वश्यके सर्वकार्येषु गंधः स्यात् क्रूरे चाष्टविषाणि च शांतिके
लेखनी हेमी वश्ये दारु शिखिपिच्छिका हेम्ना सर्वाणि कार्याणि क्रूरे स्या।

रु. न्काकपिच्छिका गृहीत्वा शांतिकर्मसमाहृष्टया यंचंडिकालयं सर्वकार्यंदेव
म्रा. गृहेषमथानेक्रूरकर्मच लक्षणान्येवमादीनिज्ञात्वा गुरुमुखात्प्रिये सर्व
२९ कर्माणिकुर्वीतमंत्रीतत्फलाप्तये मूलेशमादबीजंतन्महस्रयुतमस्त्रिमं
29 उत्तमांगेपराबीजंचंद्रायुतसमप्रभं परस्परकरस्पर्शज्वालितानंदनिर्भरैः
मूलादिब्रह्मरंध्रांतमनवच्छिन्नरूपिभिः परामृतरसासेकैः सिक्तमापादम
स्तकं आत्मानंभावयेत्त्रिसंसमभवेदजरामरः एवंध्यात्वाकुलेशानिसर्वक
र्माणिसाधयेत् सिध्यंतितस्मादेविनात्रकार्याविचारणा ध्यानभेदंप्र
वक्ष्यामिसर्वसिद्धिकरंप्रिये ईप्सितंलभतेयेनपूजाहोमादिकंविना
स्थानेस्थानोहरेदेविसाधकःस्थिरमानसः स्थित्वासुखासनेध्यायेद्गुरु
वंदनपूर्वकं मस्तकस्थितसंपूर्णचंद्रमंडलमध्यमे श्रीप्रासादपराबीजं २९

षोडशस्वरसंयुतं शुद्धस्फटिककर्पूरकुन्देन्दुधवलश्रिये सर्वेन्दुबिंबसं
जातस्रवाप्लावितविग्रहं आत्मानं भावयेद्विनिश्चलेनान्तरात्मना श्री
प्रसादपरामंत्रमष्टोत्तरसहस्रकं तरुणोल्लाससहितं मंडलं प्रजपेत्प्रि
ये अपमृत्युमहारोगजरामरणजं भयं ग्रहापस्मारवेतालभूतोन्मादा
दिजं भयं निर्वाधिव्याधिरहितः पुत्रपौत्रसमन्वितः जीवेद्वर्षशतं सा
ग्रं पूजितः सर्वमानवैः अमृतं तु ध्यानेनात्मकं विना निर्मला भवेत् विना
योजायते सा नात्रात्र कार्या विचारणा ज्वरोन्मादादिरोगेषु जपेच्छिरसि सिं
चयेत् शूलवातव्रणग्रंथिमूत्रकृच्छ्रादिसंभवैः नत्रस्थानेषु देवेशि एवं
वच्चिंतयन् जपेत् महारोगेषु जातेषु सर्वांगेषु विचिंतयेत् नत्वणाच्छ्री
त्रिमायांति रोगाः सर्वे न संशयः दशेंद्रियेषु योध्यायेद्धमेंद्रियस्थोप्येवं य।

कु० त्रवीजं स्मरेत्तत्र तत्फलं भवति ध्रुवं सदा संचिंतयेन्मूर्ध्नि स भवेदजरामरः
स्त्रा० सर्वरोगहरं विद्धि दारिद्र्यं च परं प्रिये अस्मात्परतरं ध्यानं नास्ति सत्यं न सं
३० शयः सात्विकं ध्यानं जं देवि फलमेतदुदीरितं शांतिकर्माणि विधिनाध्या
नेनानेन साधयेत् द्वादशाधारपद्मेषु द्वादशवासंयुतं वीजं संचिंतयेद्यस्तु
स भवेदजरामरः षडाधारेषु षट्दीर्घयुतं वीजं विचिंतयेत् षडाधारस्थ
देवीभिः पूजिते कुलनायिके हृत्पद्मकर्णिकामध्ये सूर्यमंडलसंस्थितं
पराप्रासादवीजं तं तरुणारुणसन्निभं जपावंधूकसिंदूरपद्मरागप्रभो
ज्ज्वलं पंचविंशतिभिः स्पर्शाक्षरैः वीजमंबिके तत्प्रभापटलछायारक्ती
कृतजगत्त्रयं आत्मानं संस्मरेद्देवि निश्चलेनांतरात्मना पराप्रासादवीजं तं
नो यौवह्नीसमसंयुतं अष्टोत्तरसहस्रन्तु मंडले प्रजपेत्सुधीः देवदानवगंधर्व १०

सिद्धगुह्यककिन्नरान् विद्याधरान्सभीमपन्नगान्मानवान्पशूरः स्त्रियः सि

द्धयाद्योरग्रैन्द्रादीनन्याङ्कष्टम्रगानपि वशीकरोत्यसंदेहः किं पुनर्मानवा

दिकान् महदैश्वर्य्यमाप्नोति स्वर्गभोगादिकं प्रिये यस्यमूर्ध्निस्मरन्जप्यान्म

वश्योजायते चिरान् राजस्य ध्यानजं देवि फलमेतदुदीरितं वश्यकर्माणिम

दीर्णविधिनानेन साधयेत् सर्ववश्यकरं देवि सर्वैश्वर्यफलप्रदं अस्मात्प

रतरं ध्यानेनास्ति सत्यं न संशयः मूलाधारसरोजान्तर्वह्निमंडलमध्यगं

पराप्रासादबीजं तं कालानलाग्निसमप्रभं अतिरोमैस्त्रसंपीतं दशभिर्व्या

पकान्तैः स्वयं जस्यानलः समस्तवश्यभयंकर दहित्याशांतिनस्त्रा

त्वक्स्थोग्रदेहिमेलोमसः यौवनोल्लाससहितः पराप्रासादसंज्ञके मंत्र

नमंडलेनध्यातदेहेनरासहस्त्रकं अनिष्टकारिणसर्वाकलहापासकारि

क्रु॰ णः कृत्याद्वेषकराङ्कुशान्सपर्याविघ्नकारिणः भूतोग्रग्रहवेतालपिशा
मन्त्रा॰ चब्रह्मराक्षसान् तद्दिङ्मध्यपतितान्त्रिदृग्यान्विचिंतयेत् तेनैनना
३१ शमायांति शरभास्त्र पार्वति यस्य मूर्ध्नि स्मरेद्बीजं स शृंखलमपि गच्छति ध्या
31 नेनानेन देवेशि कालादीनपि नाशयेत् ग्रहरोगादिदुष्टादिविनाशनक
रं प्रिये अस्मात्परतरं ध्यानं नास्ति सत्येन संशयः नाम सध्यानजं देवि फल
मेतदुदीरितं दुष्टमारणकर्माणि विधिनानेन साधयेत् रसादिध्यानभे
दांश्च ज्ञात्वा गुरुमुखात्प्रिये षट्कर्माणि प्रयुंजीत नान्यथा वीरवंदिते खदि
राश्वत्थमंदारामृताभाजसमिद्भवैः पनसोदुंबराश्वत्थलत्तापामार्गसद्भवैः
नैयावनेसितां भोजनभयादिकुमादिभिः सितैरक्तैः शुभद्रव्यैः शामित्र
फलान्वितैः मधैरस्य पायसैर्हवीः सद्विविल्वतंदुलैः मधुरत्रयसंयुक्तैः श ३१

मंत्रविकल्पनायिके एकेनवाथसर्वैर्वा तत्कार्यं गुरुलाघवं ज्ञात्वा देवि स
हस्रं वा त्रिसहस्रं वा पंचवा अयुतेन नियुतेन वापि प्रयुतेन वा ऊर्ध्वलेख्यारि तत्क्र
मोद्दिष्टे ॐ उं संस्कृते हव्यवाहने आवाह्य देवतामस्मिन्ध्यात्वा तां सावरणां त्रि
ये विधिवज्जुहुयाद्देवि तत्कृतेनोत्तरात्मना सर्वरोगज्वरोन्मादापस्मारोन्मा
नकृतमजं सर्वदुःखं प्रशमयेत्क्षणात्रान्नसंशयः अनेन सर्वशांतिश्च विद्या
ज्ञानं लभेत्प्रिये करवीराशोकवकुलपुन्नागाग्रमधूकजैः चंपककठयणाला
शपाटलश्रीकपित्थजैः मालतीमल्लिकाजातिबंधूककह्लारपंकजैः कल्हा
रारुणमंदारजातिकुंदजपादिभिः रक्तैः श्वेतैः शुभैर्गंधैः समित्पत्रफलान्वितैः
ऊ पूर्ववज्जुहुयाद्देवि विधिवन्मंत्रवित्तमः महीपतीश्चकुरुषान्कोनायौवनग
र्विता सिंहान्मत्तगजान्व्याघ्रान्सर्पांश्च दुष्टसत्त्वान्नृपानपि सिद्धदेवासुरोरगयक्षगंधर्वे

पिच

उ. वनितां देवान पिङ्गले शान्तिनाशयेन्नात्र संशयः राजीलवणहोमेन वश्य
मा. मात्राकर्षयेद्ध्रुवं विधिनानेन देवेशि सौभाग्यमतुलं भवेत् पीतद्रव्यैः
१२ हरिद्राद्यैः समिल्लवफलान्वितैः पूहपूस चितांगारत्रिकट्वाग्नि विषांजनं
32 उन्मत्तरससंसिक्तं पिष्टा समस्तकासेवितैः साध्यपादरजो भिक्षुचिताभस्म
समन्वितैः साध्यप्रतिकृतिं कुर्याद्देवेशि नृतरहृतजां समस्तकानिहिताशा
णांक्ते उरस्योपरि लेखयेत् खनेन्मस्थलि मामेत्रीके उस्यापोपयथाविधि मरी
मसेन मनसा उग्रहष्टिरमर्षणः चितानले विषनकृन्ममनकाष्टसमेधिते
तद्धैरम्भेद्धुयाद्देवि विधिवन्मंत्रवित्तमः कुर्याद्विद्वेषणोच्चाटमारणानि
नसंशयः शान्तिके स्मातिके देवि श्वेतवर्णं विचिंतयेत् वश्ये चैव रागं संदे
विरक्तवर्णं विचिंतयेत् आनारंताग्राकृष्णामस्ताकमीणिसाधयेत् १२

नाममेतन्मंत्रं देवि कृत्स्नवर्णान्विचिंतयेत् योन्यथा कुरुते मोहात्स भवेद्दे
वतापशुः तस्माद्देव्या मत्रयमा संकारयेत्तु बलिं सुधीः कृत्वा कर्माणि कुर्वी
तनामध्यावीरवंदिने लिखेत्त्रिकोणं षट्कोणमष्टारं च महीतलं मूलमंत्रे
लिखेन्मध्ये साध्यनाम समन्वितं षट्कोणेषु षडंगानि विलिखेत्परमेश्वरि
केसरेषु स्वरान्तष्टौ वर्गान्मंत्रेषु पार्वति भूपुरेषु चतुष्कोणे षा लिखेन्मूल
मंत्रिके पंचवर्णै रजोभिस्तु शुभं हृष्टिमनोहरं एवं यंत्रं समालिख्य विधिव
न्मंत्रवित्तमः एकविंशद्दशावर्त्तः कलशं स्थापयेत्प्रिये मध्यादिचतुरस्त्रां
तं द्वाविंशतिघटान्क्रमात् अथवाष्टदले देवि दशवा समवाषिये वन्हेरो
वाथवैकेवा कुर्यात्साधकसत्तमः अभिषिंचेत्ततः शिरास्तेन मंत्रेण सेहीपिरं
जले चर्मवस्त्रशिरश्चैव नालिकेरफलं शिरः मंत्रप्राणसमायुक्तं जपेत्कल

रु॰ शदेवतां सांवत्रिमूर्तिंरंशान्तिमानरोभैरवाम्बिनाः विदित्वगुरुविघ्नेश
स्वा॰ द्रुर्गात्वेत्रपतीग्नियेकलशेशुममभ्यर्च्यविधिवन्मत्रविनमः अभिषिंचे
११ त्प्रियंशिष्यंसर्वपापप्रशान्तये आयुःश्रीकांतिसौभाग्यविद्यारोग्यादिकं
33 भवेत् राज्ञाभिषिक्तोलभतेचक्तःसागरांमही अकिंचनोभिषिक्तस्तम
हैदैश्वर्यमाप्नुयात् वंध्याभिषिक्तालभतेपुत्रंसर्वगुणान्वितं भूतापस्मार
रोगाद्याविनश्यंतिनसंशयः त्रिलोहेवापिभूर्जेवालिखित्वायंत्रमुत्तमं वि
धृतेवाहृनादेविसर्वरत्नाकरंभवेत् आयुरारोग्यमैश्वर्यंविद्यालाभमया
शोजयं पराप्रासादमंत्रस्तोत्रश्रवणेतेनात्रसंशयः वहुनात्रकिमुक्तेनत्रिषु
लोकेषुमेप्रिये अनेनमंत्रराजेननासाध्यंविद्यतेक्वचित् ऊर्ध्वाम्नाये।
कनिष्ठानःपराप्रासादमंत्रवित् कुलार्णवार्थतत्वज्ञोजीवन्मुक्तःकुले ११

पुरि सर्वतीर्थे वाप्यतीर्थे वा जनमध्येपि वा वसन् पराप्रासादमंत्रज्ञो मुक्त
एव न संशयः आगमोक्तेन विधिना क्रमशो जापतः स्मरेत् श्रीप्रासादपरां वी।
जेमष्टोत्तरशतं जपेत् मुच्यते ब्रह्महत्यादिमहापापैश्च पंचभिः द्विशतं।
यो जपेद्देवि श्रीप्रासादपरामंत्रं वत्सराशीतिलक्षाणां यथारण्यावर्तितैर।
पि अयोनिनां गर्ववर्तितैरसंख्यैः जननार्जितैः बाल्ये कैशोरयौवने वाल्पेना
ग्रन्त्यमस्त्वपि च कर्मणा मनसा वाचा ज्ञाताज्ञानकृतैरपि महापातकसं
घैश्चोपपातकराशिभिः मुच्यते नात्र संदेहः सत्यमेतद्वरानने त्रिशतं
यो जपेद्देवि श्रीप्रासादपरामंत्रं सर्वक्रतुषु यत्पुण्यं सर्ववेदेषु यत्फलं
सर्वदानेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं तत्फलं लभते देवि नात्र कार्या वि
चारणा चतुःशतं जपेद्यस्तु श्रीप्रासादपरामंत्रं सदानस्पृहहारमणि

ऊ. साधकः सिद्धयः सर्वे तेनात्र संदेहः सर्वसिद्धिसमन्वितः यद्यन्मनोभि।
प्रा. लषितं तेन तत्प्राप्नोति न संशयः धर्मार्थकाममोक्षाश्च सात्त्वानस्य करे स्थि
२८ तः सालोक्यप्रमुखां देवि लभेन्मुक्तिं च न विधा जपेत्सर्वथा तेन यत्नतः श्री।
34 प्रासादपरामंत्रं तत्फलं नैव शक्नोमि कथितुं फलनायिके तस्मात्सर्वत्र
यत्नेन सर्वावस्थासु सर्वदा श्रीप्रासादपरामंत्रं प्रजपेद्भुक्तिमुक्तये ॥

३४

5554
F - 34

Complete

Sharma